अचलासप्तमीव्रतमाहात्म्यम्

भविष्योत्तरे

स॰मी ॥ई॰॥ श्रीगणेशायनमः॥ अकेवेणशरीरेणसुपुष्टेणापिकिंफलं॥ स्नानदानादिहीनेनय
१ थोक्तंयदुनंदन॥१॥ प्रातःस्नानसमर्थंतस्पशरीरंयस्यदेहिनः। किंतेनवदवक्तव्यमाद्येसंसार
भीरुणा॥२॥ कायाक्लेशसहानार्यानभवंतियुद्धत्तम॥ सुकुमार्यशरीरस्यपद्मविन्दुक्षमास्तथै
व च॥३॥ कथंनार्यःसुरूपास्तुसुभगासुप्रजास्तथा। प्रातःस्नानेनमहतायेनपुण्यमवाप्यते॥४॥ स्त्री
णांमाघेममश्रेहिस्नानंयदुकुलोद्वहः॥ ॥श्रीकृष्णोवाच॥ ॥श्रूयतांपांडवश्रेष्ठरहस्यंऋषिभा
षितं॥५॥ यन्मयेनपुराप्रोक्तंअचलासप्तमीव्रतं। वेशपांडुमतीनामरूपादार्यगुणान्विता॥६॥ आ
सीत्कुरंकुलश्रेष्ठस्मागरेवाविशांपते॥ हृदिदर्शादीतयामाससंसारस्यानवस्थितिं॥७॥ असा
रेस्मिन्संसारेसमुद्रोर्मीवभंगुरे जन्ममृत्युः। जराग्राह्यो कश्चिन्तांकिंचिन्नबुध्यते॥८॥ न
यांतिदिवंपुंसांधर्मार्थवर्जिता। नतेपुनरिहायांतिशाब्दानुपाययथानराः॥९॥ पूर्वकर्मप्रभावे

सा

२

नसुखदुःखंप्रजायते॥ममप्रभावाद्दुरपायामतिरासीन्महामते॥१०॥स्नानंदानंजपोहोमःस्वा
ध्यायपितृतर्पणं॥यस्मिन्नक्रियतेमोहात्सर्वथासद्दिवसोनृणां॥११॥पुत्रमित्रगृहक्षेत्रसमा
सक्तंहिमानसं॥पत्नीचयोगमासाद्यामृत्युरादायगच्छति॥१२॥मूषकानामिवान्नाणांहरतां
चरतांधनं॥वनेकालमार्जारएषप्रपततिनिष्ठुरः॥१३॥इत्येवंचिंतयित्वातुवैश्यपाडुमतीततः
वसिष्ठस्याश्रमःपुण्यंगतागजगामिनी॥वसिष्ठमृषिमासीनंप्रणम्यविनयात्ततः॥कृतांज
लिपुटोभूत्वाइदंवचनमब्रवीत्॥१४॥ ॥पाडुमत्युवाच॥ ॥दशसूनासमश्चक्रीदशचक्रीसमोध्वजः
॥दशध्वजसमावेश्यातस्माद्वेश्याहिनिंदिता॥१६॥मयानदत्तंनहुतंनोपवासव्रतंकृतं॥भक्त्यानपू
जितःशंभुर्नचशार्ङ्गधरोर्चितः॥१७॥सांप्रतंतप्यमानायाःव्रतंकिंचिद्वदस्वमे॥येनदुःखांबुपंकौ
घात्तरयामिभवार्णवात्॥१८॥तस्यास्तद्वचनंश्रुत्वावसिष्ठोवाक्यमब्रवीत्॥माघस्यासितप

म्यांसर्वकामफलंप्रदां ॥ १९ ॥ सुखसौभाग्यजननंस्नानंकुरुवरानने ॥ २० ॥ षष्ठ्यामेकाशनंकृ
त्वासप्तम्यांनिश्चलंजलं । राध्यतेचालयेत्तीर्थंकृत्वाशिरसिदीयकं ॥ २१ ॥ माघस्यासितसप्तम्यां
मचलाचालितंमया ॥ अलमलानांसर्वेषांकृतंप्रक्षालनंतथा ॥ २२ ॥ वसिष्ठवचनंश्रुत्वातत
स्मिन्नह्नियुधिष्ठिर ॥ सावैचकारेंदुमतीस्नानदानंयथाविधि ॥ इहस्नानप्रभावेनभुक्त्वाभो
गान्यथेप्सितान् ॥ २३ ॥ इंद्रस्यराजमहिषीपौलोमीवर्त्ततेधुना ॥ अचलासप्तमीस्नानंकथि
तंतवशांतये ॥ २४ ॥ सर्वपापप्रशमनीसुखसौभाग्यवर्द्धनी ॥ युधिष्ठिरोवाच ॥ ॥ सप्तमीस्ना
नमाहात्म्यंश्रुतंसंतंसर्वंविशेषतः ॥ साम्प्रतंश्रोतुमिच्छामिविधिंमंत्रसमन्वितं ॥ ॥ श्रीकृ
ष्णोवाच ॥ ॥ एकभक्तेनसंतिष्ठेत्षष्ठ्यांसंपूज्यभास्करं ॥ सप्तम्यांतुव्रजेत्प्रातःसुगंभी
रंजलाशयं ॥ सरित्सरस्तडागंवादेवखातमथापिवा ॥ २७ निर्मलंस्वादुसलिलंदृष्टस

त्वैरदूषितं ॥ पशुभिः पक्षिभिः श्चैव जलजैर्मकरकच्छपैः ॥ २८ ॥ जलं न चाल्पते यावत् यावत्स्नानं
२ समाचरेत् ॥ सौवर्णी राजती ताम्रपात्रे भक्त्या समाहितः ॥ अलाबूर्यं केनापि मृन्मयेनापि कारये
त् ॥ सौवर्णी वर्त्ति विहिता शिखारत्नमयी स्मृता ॥ रक्तांकोसुंभकेनापि सूत्रेणापि हि पिहि भक्तितः
॥ घृतेन वर्त्ति वितता महाराजन्निर्मिता ॥ समाहितमना भूत्वा दत्वा शिरसि दीपकं ॥ भास्कर
2 हृदये ध्यात्वा स्वयं मंत्रमुदीरयेत् ॥ माघस्य शुक्ल सप्तम्यां अचलं चालितं मया ॥ मस्तके दीप
कं दत्वा पापं यातु सहस्रधा ॥ जन्मजन्मकृतं पापं मया सप्तसु सप्तसु ॥ जन्मरोगं च शोकं च
माकरिष्यति सप्तमी ॥ अचलं चालये मस्तके कृत्वा शिरसि दीपकं ॥ माघस्नानं कुर्वंतेन सर्व
पापैः प्रमुच्यते ॥ नमस्ते रुद्ररूपाय रसानां पतये नमः ॥ वरुणाय नमस्तुभ्यं हरिवास नमो
स्तुते ॥ जलोपरि चिरं दीपे स्नानं संतर्पदेवतां ॥ चंदनेन लिखेत्पद्मं अष्टपत्रे सकर्णिकं ॥ सोव

एंभास्करंपार्थरूपंवास्थापयेत्सुधी॥कृत्वागुर्वक्षराणांवसूर्यंसंपूजयेत्ततः॥मध्येशिवं
सपत्नीकंप्राणावेनप्रपूजयेत्॥शाक्रदलेरविःपूज्योभानुश्चैवानलेदले॥याम्येन
स्वानेनक्षात्मभास्कराख्यंप्रपूजयेत्॥पश्चिमेसविताःपूज्यःपादर्कश्चवादनिलदले॥सोमसहस्र
किरणंशैवसर्वात्मनेनमः॥पूज्याःप्राणवपूर्वास्तुनमस्कारांतयोजिताः॥४८॥पुष्पैर्धूपैश्च
नैवेद्यैर्वस्त्रैराद्यैर्घभास्करं॥प्रदक्षिणांनमस्कुर्यादत्वाचार्घ्यंयथाविधिः॥विसृज्याविधिना
पश्चात्स्वगृहंगम्यतेततः॥तत्रप्रवेसुविस्तीर्णांमृन्मयेवायुधिष्ठिर॥स्थापयेत्तिलचूर्णं
तुसघृतंगुडमिश्रितं॥निक्षेप्यतुकांचनंदत्वाम्रशक्तेसमंवयथा॥संस्थाप्यरक्तवस्त्राणि
रक्तपुष्पैश्चपूजयेत्॥ततस्तुब्राह्मणेदद्यात्दत्वामंत्रेणतालकं॥आदित्यस्यप्रसादेन
नमातस्नानफलेनच॥दुष्टदोर्भाग्यदुःखानांनाशयादत्रेहिनाल्लुकं॥नत्वाव्रतापदष्टा

२ पूजयेद्दद्याद्गोतिलैः ॥ विप्रान्संभोज्य समिथुनैः पूजयित्वा यथाविधि ॥ एतत्तेकथितंपा
र्थरूपसौभाग्यकारकं ॥ अचलासप्तमीस्थानं सर्वकामफलप्रदं ॥ इदमाख्यानमम
तुलयः शृणोति नराधिप ॥ सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ॥ अचलासप्त
मीस्थानं पुण्यं दानं च तर्पणं ॥ श्राद्धं पुराणं चैव यथोक्तं प्रीयतामिति ॥ ५० ॥ इति श्री
भविष्योत्तरपुराणे अचलासप्तमीव्रतं संपूर्णं ॥ शुभमस्तु ॥ ॥ राम ॥ ॥ राम ॥ ॥

आगीजानीद्दामोदरस्य

3